# SHRIMAD BHAGWAT RASIK KUTUMBA

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## Uddhav Geeta, Third Sopan(11.15)



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्॥**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**

**devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam**

**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ पञ्चदशोऽध्यायः ॥**

**Śrīmadbhāgawatamahāpurāṇam**

**Ekādaśḥ skandhaḥ**

**.. atha pañcadaśo'dhyāyaḥ ..**

## श्रीभगवानुवाच

**जितेन्द्रियस्य युक्तस्य, जितश्वासस्य योगिनः ।**
**मयि धारयतश्चेत, उपतिष्ठन्ति सिद्धयः ॥ 1॥**

śrībhagavānuvāca

jitendriyasya yuktasya, jitaśvāsasya yoginaḥ .

mayi dhārayataśceta, upatiṣṭhanti siddhayaḥ .. 1..

jitaśvā+ sasya, dhārayataś+ ceta

उद्धव उवाच

कया धारणया कास्वित् , कथं(व्)स्वित् सिद्धिरच्युत ।

कति वा सिद्धयो ब्रूहि, योगिनां(म्) सिद्धिदो भवान् ॥ 2॥

uddhava uvāca

kayā dhāraṇayā kāsvit, katham(v)svit siddhiracyuta .

kati vā siddhayo brūhi, yogināṃ(m) siddhido bhavān .. 2..

siddhi+ racyuta

श्रीभगवानुवाच

सिद्धयोऽष्टादश प्रोक्ता, धारणायोगपारगैः ।

तासामष्टौ मत्प्रधाना, दशैव गुणहेतवः ॥ 3॥

śrībhagavānuvāca

siddhayo'ṣṭādaśa proktā, dhāraṇāyogapāragaiḥ .

tāsāmaṣṭau matpradhānā, daśaiva guṇahetavaḥ .. 3..

dhāraṇā+ yogapāragaiḥ

अणिमा महिमा मूर्तेर्- लघिमा प्राप्तिरिन्द्रियैः ।

प्राकाम्यं(म्) श्रुतदृष्टेषु, शक्तिप्रेरणमीशिता ॥ 4॥

aṇimā mahimā mūrter- laghimā prāptirindriyaiḥ .

prākāmyaṃ(m) śrutadṛṣṭeṣu, śaktipreraṇamīśitā .. 4..

prāpti+ rindriyaiḥ, śakti+ preraṇa+ mīśitā

गुणेष्वसं(ङ्)गो वशिता, यत्कामस्तदवस्यति ।
एता मे सिद्धयः(स्) सौम्य, अष्टावौत्पत्तिका मताः ॥ 5॥

guṇeṣvasaṃ(ṅ)go vaśitā, yatkāmastadavasyati .
etā me siddhayaḥ(s) saumya, aṣṭāvautpattikā matāḥ .. 5..

yatkāmas+ tada+ vasyati, aṣṭā+ vaut+ pattikā

अनूर्मिमत्त्वं(न्) देहेऽस्मिन्, दूरश्रवणदर्शनम् ।
मनोजवः(ख्) कामरूपं(म्), परकायप्रवेशनम् ॥ 6॥

anūrmimattvaṃ(n) dehe'smin, dūraśravaṇadarśanam .
manojavaḥ(kh) kāmarūpaṃ(m), parakāyapraveśanam .. 6..

anūr+ mimat+ tvaṃ(n), dūra+ śravaṇa+ darśanam, parakā+ yapraveśanam

स्वच्छन्दमृत्युर्देवानां(म्), सहक्रीडानुदर्शनम् ।
यथासं(ङ्)कल्पसं(व्)सिद्धि- राज्ञाप्रतिहतागतिः ॥ 7॥

svacchandamṛtyurdevānāṃ(m), sahakrīḍānudarśanam .
yathāsaṃ(ṅ)kalpasaṃ(v)siddhi- rājñāpratihatāgatiḥ .. 7..

svacchanda+ mṛtyur+ devānāṃ(m), saha+ krīḍā+ nudarśanam

yathā+ saṃ(ṅ)kalpa+ saṃ(v)siddhi, rājñā+ prati+ hatāgatiḥ

त्रिकालज्ञत्वमद्वन्द्वं(म्), परचित्ताद्यभिज्ञता ।
अग्न्यर्काम्बुविषादीनां(म्), प्रतिष्टम्भोऽपराजयः ॥ 8॥

trikālajñatvamadvandvaṃ(m), paracittādyabhijñatā .
agnyarkāmbuviṣādīnāṃ(m), pratiṣṭambho'parājayaḥ .. 8..

trikā+ lajñatva+ madvandvaṃ(m), paracittā+ dyabhijñatā

agnyar+ kāmbu+ viṣādīnāṃ(m), pratiș+ ṭambho'+ parājayaḥ

एताश्चोद्देशतः(फ्) प्रोक्ता, योगधारणसिद्धयः ।
यया धारणया या स्याद् , यथा वा स्यान्निबोध मे ॥ 9॥

etāścoddeśataḥ(ph) proktā, yogadhāraṇasiddhayaḥ .

yayā dhāraṇayā yā syād, yathā vā syānnibodha me .. 9..

etāś+ cod+ deśataḥ(ph), yoga+ dhāraṇa+ siddhayaḥ, syān+ nibodha

भूतसूक्ष्मात्मनि मयि,तन्मात्रं(न्) धारयेन्मनः ।

अणिमानमवाप्नोति, तन्मात्रोपासको मम ॥ 10॥

bhūtasūkṣmātmani mayi, tanmātraṃ(n) dhārayenmanaḥ .

aṇimānamavāpnoti, tanmātropāsako mama .. 10..

bhūta+ sūkṣmāt+ mani, aṇimā+ nama+ vāpnoti, tanmātro+ pāsako

महत्यात्मन्मयि परे, यथासं(व्)स्थं(म्) मनो दधत् ।

महिमानमवाप्नोति,भूतानां(ञ्) च पृथक् पृथक् ॥ 11॥

mahatyātmanmayi pare, yathāsaṃ(v)sthaṃ(n) mano dadhat .

mahimānamavāpnoti, bhūtānāṃ(ñ) ca pṛthak pṛthak .. 11..

mahatyāt+ manmayi, mahimā+ nama+ vāpnoti

परमाणुमये चित्तं(म्),भूतानां(म्) मयि रं(ञ्)जयन् ।

कालसूक्ष्मार्थतां(म्) योगी, लघिमानमवाप्नुयात् ॥12॥

paramāṇumaye cittaṃ(m), bhūtānāṃ(m) mayi raṃ(ñ)jayan .

kālasūkṣmārthatāṃ(m) yogi, laghimānamavāpnuyāt .. 12..

paramā+ ṇumaye, kāla+ sūkṣmār+ thatāṃ(m),

laghimā+ nama+ vāpnuyāt

धारयन् मय्यहं(न्)तत्त्वे, मनो वैकारिकेऽखिलम् ।

सर्वेन्द्रियाणामात्मत्वं(म्), प्राप्तिं(म्) प्राप्नोति मन्मनाः ॥ 13॥

dhārayan mayyahaṃ(n)tattve, mano vaikārike'khilam .

sarvendriyāṇāmātmatvaṃ(m), prāptiṃ(m) prāpnoti manmanāḥ .. 13..

vaikā+ rike'+ khilam, sarvendriyā+ ṇāmāt+ matvaṃ(m)

महत्यात्मनि यः(स्) सूत्रे, धारयेन्मयि मानसम् ।
प्राकाम्यं(म्) पारमेष्ठ्यं(म्) मे, विन्दतेऽव्यक्तजन्मनः ॥ 14॥

mahatyātmani yaḥ(s) sūtre, dhārayenmayi mānasam .
prākāmyaṃ(m) pārameṣṭhyaṃ(m) me, vindate'vyaktajanmanaḥ .. 14..

mahat+ yāt+ mani, dhārayen+ mayi, vindate'+ vyakta+ janmanaḥ

विष्णौ त्र्यधीश्वरे चित्तं(न्), धारयेत् कालविग्रहे ।
स ईशित्वमवाप्नोति, क्षेत्रक्षेत्रज्ञचोदनाम् ॥ 15॥

viṣṇau tryadhīśvare cittaṃ(n), dhārayet kālavigrahe .
sa īśitvamavāpnoti, kṣetrakṣetrajñacodanām .. 15..

īśit+ vama+ vāpnoti, kṣetra+ kṣetrajña+ codanām

नारायणे तुरीयाख्ये, भगवच्छब्दशब्दिते ।
मनो मय्यादधद् योगी, मद्धर्मा वशितामियात् ॥ 16॥

nārāyaṇe turīyākhye, bhagavacchabdaśabdite .
mano mayyādadhad yogi, maddharmā vaśitāmiyāt .. 16..

bhagavac+ chabda+ śabdite, mayyā+ dadhad ,vaśitā+ miyāt

निर्गुणे ब्रह्मणि मयि, धारयन् विशदं(म्) मनः ।
परमानन्दमाप्नोति, यत्र कामोऽवसीयते ॥ 17॥

nirguṇe brahmaṇi mayi, dhārayan viśadaṃ(m) manaḥ .
paramānandamāpnoti, yatra kāmo'vasīyate .. 17..

paramā+ nandamāp+ noti

श्वेतद्वीपपतौ चित्तं(म्), शुद्धे धर्ममये मयि ।
धारयञ्छ्वेततां(म्) याति, षडूर्मिरहितो नरः ॥ 18॥

śvetadvīpapatau cittaṃ(m), śuddhe dharmamaye mayi .
dhārayañchvetatāṃ(m) yāti, ṣaḍūrmirahito naraḥ .. 18..

śvetad+ vīpapatau, dhārayañ+ chvetatāṃ(m), ṣaḍūr+ mirahito

मय्याकाशात्मनि प्राणे, मनसा घोषमुद्वहन् ।
तत्रोपलब्धा भूतानां(म्) , हं(व्)सो वाचः(श्) शृणोत्यसौ ॥ 19॥

mayyākāśātmani prāṇe, manasā ghoṣamudvahan .
tatropalabdhā bhūtānāṃ(m), haṃ(v)so vācaḥ(ś) śṛṇotyasau .. 19..

mayyā+ kāśāt+ mani, ghoṣamud+ vahan, tatro+palabdhā

चक्षुस्त्वष्टरि सं(य्)योज्य, त्वष्टारमपि चक्षुषि ।
मां(न्) तत्र मनसा ध्यायन्, विश्वं(म्) पश्यति सूक्ष्मदृक् ॥20

cakṣustvaṣṭari saṃ(y)yojya, tvaṣṭāramapi cakṣuṣi .
māṃ(n) tatra manasā dhyāyan, viśvaṃ(m) paśyati sūkṣmadṛk .. 20..

cakṣus+ tvaṣṭari, tvaṣṭā+ ramapi

मनो मयि सुसं(य्)योज्य , देहं(न्) तदनु वायुना ।
मद्धारणानुभावेन, तत्रात्मा यत्र वै मनः ॥ 21॥

mano mayi susaṃ(y)yojya, dehaṃ(n) tadanu vāyunā .
maddhāraṇānubhāvena, tatrātmā yatra vai manaḥ .. 21..

mad+ dhāraṇā+ nubhāvena

यदा मन उपादाय , यद् यद् रूपं( म्) बुभूषति ।
तत्तद् भवेन्मनोरूपं(म्), मद्योगबलमाश्रयः ॥ 22॥

yadā mana upādāya, yad yad rūpaṃ(m) bubhūṣati .
tattad bhavenmanorūpaṃ(m), madyogabalamāśrayaḥ .. 22..

bhaven+ manorūpaṃ(m), madyo+ gaba+ lamāśrayaḥ

परकायं(म्) विशन् सिद्ध, आत्मानं(न्) तत्र भावयेत् ।
पिण्डं(म्) हित्वा विशेत् प्राणो, वायुभूतः(ष्) षडङ्घ्रिवत् ॥ 23॥

parakāyaṃ(m) viśan siddha, ātmānaṃ(n) tatra bhāvayet .

piṇḍaṃ(m) hitvā viśet prāṇo, vāyubhūtaḥ(ṣ) ṣaḍaṅghrivat .. 23..

पार्ष्ण्याऽऽपीड्य गुदं(म्) प्राणं(म्), हृदुरः(ख्)कण्ठमूर्धसु ।
आरोप्य ब्रह्मरन्ध्रेण, ब्रह्म नीत्वोत्सृजेत्तनुम् ॥ 24॥

pārṣṇyā''pīḍya gudaṃ(m) prāṇaṃ(m), hṛduraḥ(kh)kaṇṭhamūrdhasu .

āropya brahmarandhreṇa, brahma nītvotsṛjettanum .. 24..

pār+ṣṇyā''+ pīḍya , hṛduraḥ(kh)+ kaṇṭha+ mūrdhasu, nītvot+ sṛjet+ tanum

विहरिष्यन् सुराक्रीडे, मत्स्थं(म्) सत्त्वं(म्) विभावयेत् ।
विमानेनोपतिष्ठन्ति, सत्त्ववृत्तीः(स्) सुरस्त्रियः ॥ 25॥

vihariṣyan surākrīḍe, matsthaṃ(m) sattvaṃ(m) vibhāvayet .

vimānenopatiṣṭhanti, sattvavṛttīḥ(s) surastriyaḥ .. 25..

vimāneno+ patiṣṭhanti

यथा सं(ङ्)कल्पयेद् बुद्ध्या , यदा वा मत्परः(फ्) पुमान् ।
मयि सत्ये मनो युं(ञ्)जं(व्)स्- तथा तत् समुपाश्नुते ॥ 26॥

yathā saṃ(ṅ)kalpayed buddhyā, yadā vā matparaḥ(ph) pumān .

mayi satye mano yuṃ(ñ)jaṃ(v)s- tathā tat samupāśnute .. 26..

tatsamupāś+ nute

यो वै मद्भावमापन्न, ईशितुर्वशितुः(फ्) पुमान् ।
कुतश्चिन्न विहन्येत, तस्य चाज्ञा यथा मम ॥ 27॥

yo vai madbhāvamāpanna, īśiturvaśituḥ(ph) pumān .

kutaścinna vihanyeta, tasya cājñā yathā mama .. 27..

īśitur+ vaśituḥ(ph), kutaś+ cin+ na

मद्भक्त्या शुद्धसत्त्वस्य, योगिनो धारणाविदः ।
तस्य त्रैकालिकी बुद्धिर्- जन्ममृत्यूपबृं(व्)हिता ॥ 28॥

madbhaktyā śuddhasattvasya, yogino dhāraṇāvidaḥ .

tasya traikālikī buddhir- janmamṛtyūpabṛṃ(v)hitā .. 28..

janmamṛtyū+ pabṛṃ(v)hitā

अग्न्यादिभिर्न हन्येत, मुनेर्योगमयं(म्) वपुः ।

मद्योगश्रान्तचित्तस्य, यादसामुदकं(म्) यथा ॥ 29॥

agnyādibhirna hanyeta, muneryogamayaṃ(m) vapuḥ .

madyogaśrāntacittasya, yādasāmudakaṃ(m) yathā .. 29..

agnyā+ dibhir+ na, muner+ yogamayaṃ(m)

madyo+ gaśrān+ tacittasya, yādasā+ mudakaṃ(m)

मद्विभूतीरभिध्यायन्, श्रीवत्सास्त्रविभूषिताः ।

ध्वजातपत्रव्यजनैः(स्), स भवेदपराजितः ॥ 30॥

Madvibhūtīrabhidhyāyan, śrīvatsāstravibhūṣitāḥ .

dhvajātapatravyajanaiḥ(s), sa bhavedaparājitaḥ .. 30..

Mad+ vibhūtī+ rabhi+ dhyāyan, śrīvatsās+ travibhūṣitāḥ,

dhvajā+ tapatra+ vyajanaiḥ(s)

उपासकस्य मामेवं(म्), योगधारणया मुनेः ।

सिद्धयः(फ्) पूर्वकथिता, उपतिष्ठन्त्यशेषतः ॥ 31॥

upāsakasya māmevaṃ(m), yogadhāraṇayā muneḥ .

siddhayaḥ(ph) pūrvakathitā, upatiṣṭhantyaśeṣataḥ .. 31..

yogadhā+ raṇayā, upa+ tiṣṭhantya+ śeṣataḥ

जितेन्द्रियस्य दान्तस्य, जितश्वासात्मनो मुनेः ।

मद्धारणां(न्) धारयतः(ख्), का सा सिद्धिः(स्) सुदुर्लभा ॥ 32॥

jitendriyasya dāntasya, jitaśvāsātmano muneḥ .

maddhāraṇāṃ(n) dhārayataḥ(kh), kā sā siddhiḥ(s) sudurlabhā .. 32..

jitaś+ vāsāt+ mano

अन्तरायान् वदन्त्येता, युं(ञ्)जतो योगमुत्तमम् ।
मया सम्पद्यमानस्य, कालक्षपणहेतवः ॥ 33॥

antarāyān vadantyetā, yuṃ(ñ)jato yogamuttamam .
mayā sampadyamānasya, kālakṣapaṇahetavaḥ .. 33..

sampadya+ mānasya, kāla+ kṣapaṇa+ hetavaḥ

जन्मौषधितपोमन्त्रैर्- यावतीरिह सिद्धयः ।
योगेनाप्नोति ताः(स्) सर्वा, नान्यैर्योगगतिं(म्) व्रजेत् ॥ 34॥

janmauṣadhitapomantrair- yāvatīriha siddhayaḥ .
yogenāpnoti tāḥ(s) sarvā, nānyairyogagatiṃ(m) vrajet .. 34..

janmau+ ṣadhitapo+ mantrair, yogenāp+ noti, nānyair+ yogagatiṃ(m)

सर्वासामपि सिद्धीनां(म्), हेतुः(फ्) पतिरहं(म्) प्रभुः ।
अहं(म्) योगस्य सां(ङ्)ख्यस्य, धर्मस्य ब्रह्मवादिनाम् ॥ 35॥

sarvāsāmapi siddhīnāṃ(m), hetuḥ(ph) patirahaṃ(m) prabhuḥ .
ahaṃ(m) yogasya sāṃ(ṅ)khyasya, dharmasya brahmavādinām .. 35..

अहमात्माऽऽन्तरो बाह्योऽ - नावृतः(स्) सर्वदेहिनाम् ।
यथा भूतानि भूतेषु, बहिरन्तः(स्) स्वयं(न्) तथा ॥ 36॥

ahamātmāntaro bāhyo'- nāvṛtaḥ(s) sarvadehinām .
yathā bhūtāni bhūteṣu, bahirantaḥ(s) svayaṃ(n) tathā .. 36..

इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्)
सं(व्)हितायामेकादशस्कन्धे पञ्चदशोऽध्यायः ॥ 15॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(v)syāṃ(m)
saṃ(v)hitāyāmekādaśaskandhe pañcadaśo'dhyāyaḥ .. 15..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudācyate|

Pūrṇāsya Pūrṇamādāya Pūrṇamevāvashiṣyate ||

Om Shāntih(ś) Shāntih(ś) Shāntih ||

